कुम्भलः कमलश्चैव सानन्दश्चन्द्रशेखरः ॥
सुखदः कुमुदो जायी कन्दर्पो जयमङ्गलः ।
तिलको ललितश्चेति ध्रुवकाः षोडश स्मृताः ॥
एकादशाक्षरपदादेकैकाक्षरवर्द्धितैः ।
खण्डैर्ध्रुवाः षोडश स्युः षड्विंशत्यक्षरावधि ॥
द्विगुणैरक्षरैरेव पदमेकमिहेष्यते ।
उद्ग्राहध्रुवकाभोगैरित्थं षट्पदनिर्णयः ॥
पञ्चपादे तु ध्रुवके पदेनैकेन तद्ध्रुवः ।
चतुष्पादे तु ध्रुवके पृथगाख्यैव तद्ध्रुवः ॥"
इति सङ्गीतदामोदरः ॥

ध्रुवका, स्त्री, (ध्रुवक + टाप् ।) ध्रुवका । ध्रुया इति भाषा । संज्ञा । इत्युणादिकोषः ॥

ध्रुवा, स्त्री, (ध्रुवत्यनयेति । ध्रु स्थैर्य्ये + बाहुलकात् कः । ततष्टाप् ।) स्रुक् । वटपत्राकृतियज्ञपात्रम् । इत्यमरः । २।७।२५॥ मूर्व्वा । शालपर्णी । गीतभेदः । इति मेदिनी । वे, १४ ॥ ध्रुया इति भाषा ॥ साध्वी स्त्री । इति शब्दरत्नावली ॥

ध्रेक, ऋ ङ स्वने । उत्साहे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) रेफमध्यः । शब्दार्थौ । उत्साहो वृद्धिरिति चन्द्रः । औन्नत्यमिति क्षीरस्वामी । ऋ, अदिध्रेकत् । ङ, ध्रेकते लोकः शब्दायते उत्सहते वेत्यर्थः । स्वनेनोत्साहः स्वनोत्साहः । इति केचित् । तन्मते स्वनेनोत्सहते इत्यर्थः । इति दुर्गादासः ॥

ध्रै, तृप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-अनिट् ।) रेफोपधः । ध्रायति लाभाल्लोकः प्रीतः स्यादित्यर्थः । इति दुर्गादासः ॥

ध्वंसः, पुं, (ध्वन्स + भावे घञ् ।) नाशः । यथा,— जन्याभावत्वं ध्वंसत्वमिति सिद्धान्तमुक्तावली ॥ (यथा, पञ्चतन्त्रे । १ । ११७ ।
"दर्शितभयेऽपि धातरि
धैर्य्यध्वंसो भवेन्न धीराणाम् ।
शोषितसरसि निदाघे
नितरामेवोद्धतः सिन्धुः ॥")

ध्वंसनं, क्ली, (ध्वंस + भावे ल्युट् ।) ध्वंसः । (यथा, भागवते । ५ । १ । २३ ।
"इति ह वाव स जगतीपतिरीश्वरेच्छयाधिनिवेशितकर्म्माधिकारोऽखिलजगद्बन्धध्वंसनपरानुभावस्य भगवतः इति ॥") गमनम् । अधःपतनम् । इति ध्वन्सधातोर्भावेऽनट्प्रत्ययः ॥ (ध्वंसयतीति । ध्वंस + णिच् + ल्युः । ध्वंसके, त्रि । यथा, महाभारते । ५ । १५६ । २ ।
"प्रजापतिमिवौदार्य्ये तेजसा भास्करोपमम् ।
महेन्द्रमिव शत्रूणां ध्वंसनं शरवृष्टिभिः ॥")

ध्वंसी, [न्] पुं, (ध्वंसते विनश्यतीति । ध्वन्स + णिनिः ।) पर्व्वतसम्भवपीलुवृक्षः । इति शब्दरत्नावली ॥ (ध्वंसोऽस्यास्तीति । ध्वंस + इनिः ।) नाशविशिष्टे, त्रि ॥ यथा,—
जालान्तरगते सूर्य्यकरे ध्वंसी विलोक्यते ।
त्रसरेणुस्तु विज्ञेयस्त्रिंशता परमाणुभिः ॥"
इति वैद्यकपरिभाषा ॥

ध्वज, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) वकारयुक्तः । ध्वजति । इति दुर्गादासः ॥

ध्वज, इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । इदित् ।) वकारयुक्तः । इ, ध्वञ्ज्यते । इति दुर्गादासः ॥

ध्वजः, पुं, (ध्वजोऽस्त्यस्येति । ध्वज + अर्श आदित्वादच् ।) शौण्डिकः । इति मेदिनी । जे, १० ॥ (यथा, मनुः । ४ । ८५ ।
"दशसूनासमं चक्रं दशचक्रसमो ध्वजः ।
दशध्वजसमो वेशो दशवेशसमो नृपः ॥")

ध्वजः, पुं क्ली, (ध्वजति उच्छ्रितो भवतीति । ध्वज + पचाद्यच् ।) पताका । (यथा, पञ्चतन्त्रे ।१।३२ ।
"किं तेन जातु जातेन मातुर्यौवनहारिणा ।
आरोहति न यः स्वस्य वंशस्याग्रे ध्वजो यथा ॥")
खट्वाङ्गम् । मेढ्रम् । (यथा, सुश्रुते चिकित्सितस्थाने १६ अध्याये ।
"विदग्धेस्तु सिराजालत्वङ्मांसैः चीयते ध्वजः ॥")
चिह्नम् । इति मेदिनी । जे, ११ ॥ (यथा, महाभारते । १ । ३३ । १७ ।
"तं वव्रे वाहनं विष्णुर्गरुत्मन्तं महाबलम् ।
ध्वजञ्च चक्रे भगवानुपरि स्थास्यतीति तम् ॥")
गर्व्वः । दर्पः । इति शब्दरत्नावली ॥ पूर्व्वदिशो गृहम् । इति हेमचन्द्रः ॥ पताकादण्डः । तत्पर्य्यायः । केतनम् २ । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । ७ । २७ । ६ ।
"ततोऽर्ज्जुनः सुशर्म्माणं विद्ध्वा सप्तभिराशुगैः ।
ध्वजं धनुश्चास्य तथा क्षुराभ्यां समकृन्तत ॥")
ध्वजयुक्तिर्यथा,—
"सेनाचिह्नं क्षितीशानां दण्डो ध्वज इति स्मृतः ।
सपताको निष्पताकः स ज्ञेयो द्विविधो बुधैः ॥
पताका सार्द्धदैर्घ्येण दण्डस्तु पृथिवीक्षिताम् ।
सपताकध्वजस्याग्रे यदा हस्तं परिन्यसेत् ॥
जयहस्तो ध्वजो नाम नैनं सामान्यमर्हति ।
वंशोऽथ वाकुलः शालः पालाशश्चाम्पकस्तथा ॥
नैपो नैम्बोऽथवा दण्डस्तथा वैराणवारणः ।
ब्रह्मादिकसंज्ञानां वर्णरूपप्रकाशितः ॥
सर्व्वेषाञ्चैव वंशस्तु दण्डः सम्पत्तिकारकः ॥"
अ क च ट त प य शाः ॥
"प्रतापाय पताकास्तु अष्टावेव प्रकाशिताः ।
पञ्चहस्तायता हस्तपरिणाहा जयाभिधा ॥
जया च विजया भीमा चपला वैजयन्तिका ।
दीर्घा विशाला लोला च ज्ञेया हस्तैकवर्द्धितः ॥
परिणाहे पादवृद्धिरथ वर्णस्य निर्णयः ।
रक्तः श्वेतोऽरुणः पीतश्चित्रो नीलोऽथ कर्व्वुरः ॥
कृष्णश्चेति पताकानां वर्णरूपप्रकाशितः ।
ब्रह्मादिकसंज्ञानामष्टानामेकशस्त्रयम् ॥
कलसो दर्पणश्चन्द्रः पद्मकोषो यथाक्रमम् ।
ब्रह्मक्षत्रियविट्शूद्रजातीनां संप्रकाशितः ॥
गजादियुक्ता सा प्रोक्ता जयन्ती सर्व्वमङ्गला ।
गजः सिंहो हयो द्वीपी चतुर्णां पृथिवीभुजाम् ॥
हंसादियुक्ता विज्ञेया राज्ञां सैवाष्टमङ्गला ।
हंसः केकी शुकश्चासो ब्रह्मादीनां यथाक्रमम् ॥
चामरादिसमायुक्ता सा ज्ञेया सर्व्वबुद्धिदा ।
चामरञ्चाथ पञ्चाणि चित्रवस्त्रं तथा सितम् ॥
चतुर्णां वेदनयनपञ्चेन्दुगणितक्रमात् ।
तदग्रे यदि विन्यस्तं पताकात्रितयं भवेत् ॥
इयं हि सर्व्वतो भद्रा पताका चक्रवर्त्तिनः ।
तद्वर्णः पूर्व्ववज्ज्ञेयः प्रमाणं विधिबोधितम् ॥
कानकं राजतं ताम्रं नानाधातुमयं क्रमात् ।
कुम्भादिकं प्रशंसन्ति पताकाग्रे महीभुजाम् ।
तत्रापि रत्नविन्यासो विधेयो राजतक्रमः ।
चतुर्भिर्म्मकराद्यैर्युक्ता चेत् सर्व्वसिद्धिदा ।
तदा श्रेयस्करी नाम सा पताका विजायते ॥
मकरोऽथ गजः सिंहो व्याघ्रो वाजी मृगः शुकः ।
शुचिश्चेति समुद्दिष्टमादित्यादिदशा भवाम् ॥
इति प्रोक्तः पताकानां निर्णयः पृथिवीभुजाम् ॥"
अथ निष्पताकध्वजः ।
"पूर्व्ववद्दण्डनियमस्तत्र दैर्घ्ये विशेषणम् ।
दण्डः पञ्चाणि पद्मञ्च कुम्भश्च विहगो मणिः ॥
निष्पताको ध्वजो राज्ञां षड्भिरेतैः सुसंस्थितैः ।
जयः कपाली विजयः क्षेत्रमात्रः शिवः क्रमात् ॥
राज्ञः पुरुषमानेन दण्डमानं प्रकीर्त्तितम् ।
ऊर्द्धाधःक्रमयोगेन तद्दण्डादिकमुच्यते ॥
केकी चासो मत्स्यरङ्कुस्त्रिविधानां महीभुजाम् ।
ध्वजाग्रेषु विधेयानि पञ्चाणि श्रियमिच्छताम् ॥
पद्मः कुम्भश्च विहगो मणिश्चैव यथाक्रमात् ।
उपर्य्युपरितो धेयो निष्पताके महीभुजाम् ॥
अष्ट षोड़श द्वात्रिंशच्चतुःषष्टिदलाम्बुजम् ।
वृत्ताष्टदिग्दलैश्चाढ्यः कुम्भः सम्पत्तिकारकः ॥
हंसश्चासः शुकः केकी पक्षिणश्च यथाक्रमम् ।
वज्रञ्च पद्मरागश्च नीलो वैदूर्य्यमेव च ॥
ब्रह्मक्षत्रियविट्शूद्रजातीनां स्यात् यथाक्रमम् ।
कनकं रजतं युग्मं द्विविधानां महीभुजाम् ॥
निष्पताकध्वजाद्यादिनिर्म्माणे योग इष्यते ।
पताका यदि चास्यैका सर्व्वाग्रे योगवर्णिनी ॥
अयं ध्वजो विशालाख्यो विज्ञेयश्चक्रवर्त्तिनः ।
तत्रैव चामरे योग्ये विज्ञेयाः सर्व्वसम्पदः ॥
इति राज्ञां समुद्दिष्टमन्येषां ध्वज उच्यते ।
नोर्द्ध्वं विंशतिहस्तेभ्यो न चार्व्वाक् दशहस्तकात् ।
हस्तहस्तैकसंवृद्ध्या ध्वजो दशविधो मतः ।
सहस्राधिपमारभ्य यावत् स्यादयुताधिपः ॥
न सहस्राधिपादूनो ध्वजधारणमर्हति ।
अपि कोटिपतेर्ज्ञेयो ध्वजो विंशतिहस्तकः ॥
तत्रापि वस्त्रवर्णादिनिर्णयः पूर्व्ववन्मतः ।
स्थिरता चिरता चेति निष्पताकध्वजे गुणौ ॥
यदेतदुभयं चिह्नमुभयोः संप्रकाशितम् ।
तत्प्रमाणध्वजे ज्ञेयमप्रधाने न निर्णयः ॥
निष्पताकध्वजोद्देशः प्रोक्तोऽयं भोजभूभुजा ।
एतद्विमृश्य मतिमान् चिरं सुखमवाप्नुयात् ॥
यो दम्भादथवाज्ञानाद्विलङ्घयति मानवः ।
स विषीदति नश्येत तस्य कीर्त्तिः कुलं बलम् ॥"
इति युक्तिकल्पतरुः ॥ * ॥